विशेषः। तत्पर्य्यायः। दाढ़ा २। इति हेमचन्द्रः। ३। २४७॥ (यथा, साहित्यदर्पणे। १। ३।

"यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलम्।
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी॥")

दंष्ट्रिका, स्त्री, (दंष्ट्रा विद्यतेऽस्याः। दंष्ट्रा+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति ठन्।) दाढ़िका। इति हेमचन्द्रः। ३। २४७॥

दंष्ट्री, [न्] पुं स्त्री, (प्रशस्ता दंष्ट्रा अस्त्यस्येति। दंष्ट्रा+"व्रीह्यादिभ्यश्च।" ५। २। ११६। इति इनिः।) शूकरः। इत्यमरः। २। ५। २॥ सर्पः। इति शब्दरत्नावली॥ (यथा, रामायणे। २। ३३। २३।

"विलानि दंष्ट्रिणः सर्व्वे सानूनि मृगपक्षिणः।
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि॥")

दंष्ट्राविशिष्टे, त्रि। यथा,—

"दंष्ट्रिभिः शृङ्गिभिर्व्वापि हता म्लेच्छैश्च तस्करैः।
ये स्वाम्यर्थे हता यान्ति राजन्! स्वर्गं न संशयः॥"
इति शुद्धितत्त्वे अग्निपुराणम्॥

दकं, क्ली, (उदक+पृषोदरादित्वात् साधुः।) जलम्। इति त्रिकाण्डशेषः॥

दक्ष, ङ स्वदे। वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) स्वद इह शीघ्रकरणम्। ङ, दक्षते धनसद्‌योगी। शीघ्रमुत्पादयति इत्यर्थः। इति दुर्गादासः॥ (सामर्थ्ये अकर्म्मकोऽयम्। यथा, ऋग्वेदे। २। १।११।

"तमिळा शतमिहासि दक्षसे॥"
"दक्षसे दानाय समर्था भवसि॥" इति तद्भाष्ये सायनः॥)

दक्ष, घ म ङ हन्त्यर्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) म, अदक्षि अदाक्षि। दक्षं दक्षम्। दाक्षं दाक्षम्। मानुबन्धबलादुपधयोरपि दीर्घः। क्षमते तु दीर्घविधिरूपधां नापेक्षते। घ, दक्षा। सेमत्वात् सरोरित्यनेनैवेट्सिद्धेऽस्य मानुबन्धस्वरपर्य्यन्तघटादिभ्यो ङ इति प्राचीनमतानुवादार्थः। ङ, दक्षते। हन्त्यर्थे गतिवधयोः। इति दुर्गादासः॥

दक्षः, पुं, (दक्षते सृष्टिप्रवृद्धये समर्थो भवतीति। दक्ष+अच्।) प्रजापतिविशेषः। स ब्रह्मणो दक्षिणाङ्गुष्ठाज्जातः। ततः प्रभृति मैथुनेन प्रजा जाताः। यथा,—

"शरीराणि वक्ष्यामि मानसोनान् प्रजापतेः।
अङ्गुष्ठाद्दक्षिणाद्दक्षः प्रजापतिरजायत॥"
इति मत्स्यपुराणे। ३। ६॥

"यथा ससर्ज्ज चैवादौ तथैव शृणुत द्विजाः!।
यदा तु सृजतस्तस्य देवर्षिगणपन्नगान्॥
न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः।
दक्षः पुत्रसहस्राणि पाञ्चजन्यामजीजनत्॥"
इति च तत्रैव। ५। ३—४॥

अस्य भार्य्या स्वायम्भुवमनुकन्या प्रसूतिः। अस्य षोड़शकन्याः यथा, श्रद्धा १ मैत्री २ दया ३ शान्तिः ४ तुष्टिः ५ पुष्टिः ६ क्रिया ७ उन्नतिः ८ बुद्धिः ९ मेधा १० मूर्त्तिः ११ तितिक्षा १२ ह्रीः १३ स्वाहा १४ स्वधा १५ सती १६। तस्य त्रिसहस्रपुत्राः। दक्षप्रजापतिर्द्वितीयजन्मनि दशप्रचेतसः सुतो भूत्वा षष्ठमन्वन्तरे प्रजाः सृष्टिश्चकार। स असिक्न्यां पत्न्यां षष्टिं कन्या जनयित्वा प्रजापतिभ्यो दत्तवान्। धर्म्माय दश। कश्यपाय सप्तदश। चन्द्राय सप्तविंशतिः। कृशाश्वाय द्वे। भूताय द्वे। अङ्गिरसे द्वे। इति श्रीभागवतम्॥ * ॥ ताम्रचूड़ः। (यथा, चरके सूत्रस्थाने २७ अध्याये।

"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि।
चटकानाञ्च यानि स्युरण्डानि च हितानि च॥")

मुनिभेदः। (यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ४। ६७।

"कणादो गौतमः कण्वः पाणिनिः शाकटायनः।
ग्रन्थञ्चकार यद्दत्वा दक्षः कात्यायनः स्वयम्॥"

अयं हि धर्म्मशास्त्रप्रयोजकानामन्यतमः। यथा, याज्ञवल्क्ये। १। ५।

"पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः॥")

हरवृषः। द्रुमभेदः। वह्निः। इति विश्वः॥ महेशः। इति शब्दरत्नावली॥ (यथा, महाभारते। १३। १७। ११३।

"धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः॥"

विष्णोर्नामविशेषः। यथा, महाभारते। १३। १४९। १११।

"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः॥"

बलम्। इति निघण्टुः। २। ९। "दक्ष शैघ्र्ये चकारात् वृद्धौ। दक्ष गतिहिंसनयोः। दक्षतिरुत्साहार्थः। इति स्कन्दस्वामी। असुन्। शत्रुविजये क्षिप्रो भवत्यनेन हिंस्यन्ते वानेन शत्रवः प्रोत्साहितो वा भवति शत्रुविजये।" "दक्ष इति सकारान्तं बलनाम अकारान्तमपि तस्यैवमर्थान्तरे द्रष्टव्यम्॥" इति तट्टीकायां देवराजयज्वा। यथा, ऋग्वेदे।१।९५।६।

"स दक्षाणां दक्षपतिर्बभूव॥"

"सोऽग्निर्दक्षाणां सर्व्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव।" इति तद्भाष्ये सायनः॥ गरुड़स्य पुत्त्राणामन्यतमः। यथा, महाभारते। ५। १०१। १२।

"मेघकृत् कुमुदो दक्षः सर्पान्तः सोमभोजनः॥")

त्रि, पटुः। इति मेदिनी। षे, १४॥ अस्य पर्य्यायः चतुरशब्दे द्रष्टव्यः॥ (यथा, महाभारते। १। ७४। ३९।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पतिव्रता॥"

समर्थः। यथा, ऋग्वेदे। १। ५९। ४।

"बृहती इव सूनवे रोदसी
गिरो होता मनुष्यो न दक्षः॥"

प्रवृद्धः। यथा, तत्रैव। १। १५। ६।

"युवं दक्षं धृतव्रत मित्रावरुण दूळभम्॥"
"दक्षं प्रवृद्धम्।" इति तद्भाष्ये सायनः॥

दक्षिणः। अपसव्यम्। यथा, महानिर्व्वाणे। ३। ४४।

"प्राणायामं ततः कुर्य्यात् मूलेन प्रणवेन वा।
मध्यमानामिकाभ्याञ्च दक्षहस्तस्य पार्व्वति!॥")

दक्षकन्या, स्त्री, (दक्षस्य प्रजापतेः कन्या।) दुर्गा। इति त्रिकाण्डशेषः॥ दक्षप्रजापतेः सुता। ताः षष्टिसंख्यकाः। तासां नामानि यथा,—

"सती ख्यातिः स्मृतिः स्वाहा ह्यनुसूया स्वधा तथा।
प्रीतिः क्षमा च संभूतिः सन्नतिश्च अरुन्धती॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिस्तथा रतिः॥
अरुन्धाती वसुर्यामी लवा भानुर्म्मरुत्वती।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामतः॥
अदितिश्च दितिश्चैव दनुः काला दनायुषा।
सिंहिका सुरसा कद्रुर्विनता सुरभिः खसा॥
क्रोधा इरा च प्रोवा च दक्षकन्याः प्रकीर्त्तिताः।
षष्टिस्तु सिद्धियोगिन्यः सर्व्वलोकस्य मातरः॥"
इति वह्निपुराणे गणभेदनामाध्यायः॥

(अयं द्वितीयजन्मनि प्राचेतसो भूत्वा षष्टिं कन्या जनयामास। यथा, मत्स्यपुराणे। ५।१२-१४।

"ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः।
वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा॥
प्रादात् स दश धर्म्माय कश्यपाय त्रयोदश।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमये॥
द्वे चैव भृगुपुत्त्राय द्वे कृशाश्वाय धीमते।
द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरः॥
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः॥"

एतासां नामानि तत्रैव द्रष्टव्यानि॥)

दक्षजा, स्त्री, (दक्षात् प्रजापतेर्जायते इति। जन+"पञ्चम्यामजातौ।" ३। २। ९८। इति डः।) दुर्गा। इति हेमचन्द्रः॥ (अश्विन्यादिनक्षत्रे च॥)

दक्षजापतिः, पुं, (दक्षजानां अश्विन्यादिदक्षकन्यानां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (दक्षजायाः सत्याः पतिः इति विग्रहे शिवः॥)

दक्षसावर्णिः, पुं, नवममनुः। अस्मिन् मन्वन्तरे ऋषभनामा भगवदवतारः। अद्भुतनामा इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। भूकेतुदीप्तिकेतुप्रभृतयो मनुपुत्त्रा भविष्यन्ति। इति श्रीभागवतम्॥ (अस्य विशेषविवृतिस्तु मार्कण्डेयपुराणे ९४अध्याये द्रष्टव्या॥)

दक्षा, स्त्री, (दक्षते वर्द्धते भारधारणे समर्था भवतीति वा। दक्ष+अच्। टाप्।) पृथिवी। इति मेदिनी। षे, १५॥